**आयंकं**-आतङ्कः, आशुघाती रोगः। आव० ७५९। सद्योघाती रोगः। दश० २७३। कृच्छ्रजीवनं दुःखं। आचा० ७५। आशुघाती शूलादिः। जं० प्र० १२५। भग० ४७१। सद्योघातिव्याधिः। भग० १२२। नरकादिदुःखम्। आचा० १६०। कृच्छ्रजीवितकारी, सद्योघातीत्यर्थः शूलादि। ठाणा० ११९। शूलविशूचिकादिः सद्योघाती। ठाणा० १५०। व्याधिः। भग० ६९०। आङिति सर्वात्मप्रदेशाभिव्याप्त्या तंकयन्ति – कृच्छ्रजीवितमात्मानं कुर्वन्ति इत्यातंकाः–सद्योघातिनो रोगविशेषाः। उत्त० ३३८। आतङ्कः, सद्योघातिनः। औप० ९६। आव० ५८५। ज्वरादि। पिण्ड० १७७। आचा० २९७। कृच्छ्रजीवितकारी ज्वरादिः। भग० ७०२। आतङ्कः, आशुकारी व्याधिविशेषः। दश० चू० १४। रोगः। उत्त० ४८६। ज्वरादि। आव० ८४८। ओघ० १९०। कष्टजीवितकारी। विपा० ४०। आशुजीवितापहारी शूलादिकः। सूत्र० २९२। आचा० २०५, ३३०, ३६२।

**आयंकसंपओग** – आतङ्कसम्प्रयोगः, आतङ्कः–रोगः तस्य योगः। औप० ४३।

**आयंगुल**-पुरुषात्मसम्बन्धि आत्माङ्गुलम्। अनु० १५६। अङ्गुलस्य प्रथमभेदः। प्रज्ञा० २९९।

**आयंचणं** – गोमुत्तं। नि० चू० तृ० १२७ अ। व्य० प्र० १०४ आ।

**आयंचामि**-लिंपामि, आसिञ्चामि। उपा० ३२।

**आयंतकरे** – आत्मनोऽन्तम्– अवसानं भवस्य करोतीति आत्मान्तकरः, धर्म्मदेशनानासेवकः प्रत्येकबुद्धादिः। ठाणा० २१३।

**आयंति**-आगच्छन्ति, उत्पद्यन्ते। आव० १७९।

**आयंतियमरणे**-यानि नारकाद्यायुष्कतया कर्मदलिकान्यनुभूय म्रियते मृतश्च न पुनस्तान्यनुभूय मरिष्यतीति। सम० ३३।

**आयंती** आयान्ती। आव० ३०७।

**आयंते**-आचान्तः, नवानामपि श्रोतसां शुद्धोदकप्रक्षालनेन गृहीताचमनः। जीवा० २४३। कृतपानः। भग० १६४।

**आयंदमे** – आत्मदमः, आत्मानं दमयति–शमवन्तं करोति शिक्षयति वेति। ठाणा० २१४।

**आयंबिलं**-आयाम्लम्, ओदनकुल्माषादि। औप० ४०। आचाम्लम्। आव० ८५२। शुद्धौदनादि। अनुत्त० ३। सकुरा। आव० ८५५। पानकम्। ओघ० १३३।

**आयंबिलपाउग्गं**-आचाम्लप्रायोग्यम्, (कूरविहाणाणि)। आव० ८५५।

**आयंबिलवड्ढमाणं**-आचाम्लवर्द्धमानम्, तपोविशेषः। अन्त० ३२।

**आयंबिलिए**-आचाम्लिकः। ठाणा० २९८।

**आयंभरे** – आत्मानं बिभर्त्ति-पुष्णातीत्यात्मम्भरिः। ठाणा० २४८।

**आयंस**-आदर्शः, वृषभादिग्रीवाभरणम्। अनु० ४७। दर्पणः। जं० प्र० ३९२। आदर्शः। जं० प्र० ५१०।

**आयंसघरं**-आदर्शगृहम्। आव० १७०।

**आयंसघरगं** – आदर्शगृहकम्, आदर्शमयमिव गृहकम्। जीवा० २००। जं० प्र० ४५।

**आयंसमुहदीवे**-आदर्शमुखद्वीपः, अन्तरद्वीपनाम। ठाणा० २२६।

**आयंसमुहा** – आदर्शमुखनामा नवमोऽन्तरद्वीपः। प्रज्ञा० ५०। जीवा० १४४।

**आयंसलिवी**-ब्राह्मीलिपिपञ्चदशभेदः। प्रज्ञा० ५६।

**आय**-आयः, श्रुतनाम। दश० १६। लाभः। अनु० १५४। आत्मा–शरीरम्। उत्त० ४१५। जीवश्चित्तं वा। उत्त० ५०४। अतति–सततं गच्छति तानि तान्यध्यवसायस्थानान्तराणीति आत्मा–मनः। उत्त० ३१४।

**आयइ**-आयतिः–अनागतं, उत्तरकालम्। आव० ५०९।

**आयकाय**-अनंतकायविशेषः। भग० ८०४।

**आयक्खाहि**-आख्याहि, कथय, निवेदय। भग० ११२।

**आयगय**-आत्मनि गतः आत्मगतः, आत्मज्ञ इति। सूत्र० १२४।

**आयगवेसए**-आत्मगवेषकः, आत्मानं–कर्मविगमाच्छुद्धस्वरूपं गवेषयति–अन्वेषयते यः सः। आयगवेषकः–आयः–सम्यग्दर्शनादिलाभस्तं गवेषयतीति। आयतगवेषकः–सूत्रत्वाद्आयतो वा–मोक्षस्तं गवेषयतीति वा। उत्त० ४१५।

**आयगुत्ते** – आत्मा-शरीरं तेन गुप्तः आत्मगुप्तः–न यतस्ततः करणचरणादिविक्षेपकृत्, गुप्तो–रक्षितोऽसंयमस्थानेभ्य आत्मा येन सः। उत्त० ४१५।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org